# Ribhuproktam Brahmavijnananirupanam

# ઋભુપ્રોક્તં બ્રહ્મવિજ્ઞાનનિરૂપણમ્

## Document Information

Text title : Ribhuproktam Brahmavijnananirupanam

File name : RRibhuproktaMbrahmavijnAnanirUpaNam.itx

Category : shiva, shivarahasya

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | shaNkarAkhyaH ShaShThAMshaH | adhyAyaH 20| 6-17, 24-25, 34-43 ||

Latest update : August 5, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 5, 2023

*sanskritdocuments.org*

# ઋભુપ્રોક્તં બ્રહ્મવિજ્ઞાનનિરૂપણમ્

(બ્રહ્મૈવેદમસત્સર્વમ્)
બ્રહ્મૈવેદમસત્સર્વં બ્રહ્મૈવેદં પરાયણમ્ ।
બ્રહ્મૈવેદં શરીરાણાં બ્રહ્મૈવેદં તૃણં ન ચ ॥ ૨૦.૬॥

બ્રહ્મૈવાસ્મિ ન ચાન્યોઽસ્મિ બ્રહ્મૈવેદં જગન્ન ચ ।
બ્રહ્મૈવેદં વિયન્નાસ્તિ બ્રહ્મૈવેદં ક્રિયા ન ચ ॥ ૨૦.૭॥

બ્રહ્મૈવેદં મહાત્માનં બ્રહ્મૈવેદં પ્રિયં સદા ।
બ્રહ્મૈવેદં જગન્નાન્તો બ્રહ્મૈવાહં ભયં ન હિ ॥ ૨૦.૮॥

બ્રહ્મૈવાહં સદાચિત્તં બ્રહ્મૈવાહમિદં ન હિ ।
બ્રહ્મૈવાહં તુ યન્મિથ્યા બ્રહ્મૈવાહમિયં ભ્રમા ॥ ૨૦.૯॥

બ્રહ્મૈવ સર્વસિદ્ધાન્તો બ્રહ્મૈવ મનસાસ્પદમ્ ।
બ્રહ્મૈવ સર્વભવનં બ્રહ્મૈવ મુનિમણ્ડલમ્ ॥ ૨૦.૧૦॥

બ્રહ્મૈવાહં તુ નાસ્ત્યન્યદ્બ્રહ્મૈવ ગુરુપૂજનમ્ ।
બ્રહ્મૈવ નાન્યત્કિઞ્ચિત્તુ બ્રહ્મૈવ સકલં સદા ॥ ૨૦.૧૧॥

બ્રહ્મૈવ ત્રિગુણાકારં બ્રહ્મૈવ હરિરૂપકમ્ ।
બ્રહ્મણોઽન્યત્પદં નાસ્તિ બ્રહ્મણોઽન્યત્ક્ષણં ન મે ॥ ૨૦.૧૨॥

બ્રહ્મૈવાહં નાન્યવાર્તા બ્રહ્મૈવાહં ન ચ શ્રુતમ્ ।
બ્રહ્મૈવાહં સમં નાસ્તિ સર્વં બ્રહ્મૈવ કેવલમ્ ॥ ૨૦.૧૩॥

બ્રહ્મૈવાહં ન મે ભોગો બ્રહ્મૈવાહં ન મે પૃથક્ ।
બ્રહ્મૈવાહં સતં નાસ્તિ બ્રહ્મૈવ બ્રહ્મરૂપકઃ ॥ ૨૦.૧૪॥

બ્રહ્મૈવ સર્વદા ભાતિ બ્રહ્મૈવ સુખમુત્તમમ્ ।
બ્રહ્મૈવ નાનાકારત્વાત્બ્રહ્મૈવાહં પ્રિયં મહત્ ॥ ૨૦.૧૫॥

બ્રહ્મૈવ બ્રહ્મણઃ પૂજ્યં બ્રહ્મૈવ બ્રહ્મણો ગુરુઃ ।

બ્રહ્મૈવ બ્રહ્મમાતા તુ બ્રહ્મૈવાહં પિતા સુતઃ ॥ ૨૦.૧૬॥

બ્રહ્મૈવ બ્રહ્મ દેવં ચ બ્રહ્મૈવ બ્રહ્મ તજ્જયઃ ।
બ્રહ્મૈવ ધ્યાનરૂપાત્મા બ્રહ્મૈવ બ્રહ્મણો ગુણઃ ॥ ૨૦.૧૭॥

બ્રહ્મૈવ ચિત્તવદ્ભાતિ બ્રહ્મૈવ શિવવત્ સદા ।
બ્રહ્મૈવ બુદ્ધિવદ્ભાતિ બ્રહ્મૈવ શિવવત્ સદા ॥ ૨૦.૨૪॥

બ્રહ્મૈવ શશવદ્ભાતિ બ્રહ્મૈવ સ્થૂલવત્સ્વયમ્ ।
બ્રહ્મૈવ સતતં નાન્યત્બ્રહ્મૈવ ગુરુરાત્મનઃ ॥ ૨૦.૨૫॥

અહમેવ હિ તદ્બ્રહ્મ બ્રહ્મૈવાહં જગત્પ્રભુઃ ।
બ્રહ્મૈવાહં નિરાભાસો બ્રહ્મૈવાહં નિરામયઃ ॥ ૨૦.૩૪॥

બ્રહ્મૈવાહં ચિદાકાશો બ્રહ્મૈવાહં નિરન્તરઃ ।
બ્રહ્મૈવાહં મહાનન્દો બ્રહ્મૈવાહં સદાત્મવાન્ ॥ ૨૦.૩૫॥

બ્રહ્મૈવાહમનન્તાત્મા બ્રહ્મૈવાહં સુખં પરમ્ ।
બ્રહ્મૈવાહં મહામૌની સર્વવૃત્તાન્તવર્જિતઃ ॥ ૨૦.૩૬॥

બ્રહ્મૈવાહમિદં મિથ્યા બ્રહ્મૈવાહં જગન્ન હિ ।
બ્રહ્મૈવાહં ન દેહોઽસ્મિ બ્રહ્મૈવાહં મહાદ્વયઃ ॥ ૨૦.૩૭॥

બ્રહ્મૈવ ચિત્તવદ્ભાતિ બ્રહ્મૈવ શિવવત્સદા ।
બ્રહ્મૈવ બુદ્ધિવદ્ભાતિ બ્રહ્મૈવ ફલવત્સ્વયમ્ ॥ ૨૦.૩૮॥

બ્રહ્મૈવ મૂર્તિવદ્ભાતિ તદ્બ્રહ્માસિ ન સંશયઃ ।
બ્રહ્મૈવ કાલવદ્ભાતિ બ્રહ્મૈવ સકલાદિવત્ ॥ ૨૦.૩૯॥

બ્રહ્મૈવ ભૂતિવદ્ભાતિ બ્રહ્મૈવ જડવત્સ્વયમ્ ।
બ્રહ્મૈવૌઙ્કારવત્સર્વં બ્રહ્મૈવૌઙ્કારરૂપવત્ ॥ ૨૦.૪૦॥

બ્રહ્મૈવ નાદવદ્બ્રહ્મ નાસ્તિ ભેદો ન ચાદ્વયમ્ ।
સત્યં સત્યં પુનઃ સત્યં બ્રહ્મણોઽન્યન્ન કિઞ્ચન ॥ ૨૦.૪૧॥

બ્રહ્મૈવ સર્વમાત્મૈવ બ્રહ્મણોઽન્યન્ન કિઞ્ચન ।
સર્વં મિથ્યા જગન્મિથ્યા દૃશ્યત્વાદ્ઘટવત્ સદા ॥ ૨૦.૪૨॥

બ્રહ્મૈવાહં ન સન્દેહશ્ચિન્માત્રત્વાદહં સદા ।
બ્રહ્મૈવ શુદ્ધરૂપત્વાદ્દૃગ્રૂપત્વાત્સ્વયં મહત્ ॥ ૨૦.૪૩॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે ઋભુપ્રોક્તં બ્રહ્મવિજ્ઞાનનિરૂપણં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । શઙ્કરાખ્યઃ ષષ્ઠાંશઃ । અધ્યાયઃ ૨૦। ૬-૧૭, ૨૪-૨૫, ૩૪-૪૩ ॥

- .. shrIshivarahasyam . shankarAkhyaH ShaShThAMshaH . adhyAyaH 20. 6-17, 24-25, 34-43 ..

Notes :
Shiva Rahasyam Amsa-06 consists of the 50 Adhyaya-s that comprise the Ribhu Gita.
Selected verses from Ribhu Gita have been compiled here based on similarity of content.

Proofread by Ruma Dewan

---

*Ribhuproktam Brahmavijnananirupanam*
pdf was typeset on August 5, 2023

Please send corrections to *sanskrit@cheerful.com*